तमम् २, तमित्वा २, तान्त्वा २, } [1]तमम् २-तामम् २, तमित्वा २-तान्त्वा २, } तितमिषम् २, तितमिषित्वा २, } तन्तमम् २; तन्तमित्वा २; }

[2]तमः, [3]तमसा [नदी], [4]ताम्रम्[A].

(707) " तय गतौ " (I-भ्वादिः-479. सक. सेट्. आत्म.)

तायकः-यिका, तायकः-यिका, तितयिषकः-षिका, तातयिकः-यिका; तयिता-त्री, craftयिता-त्री, तितयिषिता-त्री, तातयिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचयतिवत् (502) ज्ञेयानि। [B]प्रतय्य।

(708) " तर्क भाषार्थः " (X-चुरादिः-1781. सक. सेट्. उभ.)

आस्वदीयः।

'ऊहेऽप्ययमिति मैत्रेयः' इति मा. धा. वृत्तौ।

तर्ककः-र्किका, तितर्कयिषकः-षिका; तर्कयिता-त्री, तितर्कयिषिता-त्री; इत्यादीनि सर्वाणि रूपाणि ग्रसधातुवत् (439) बोध्यानि। क्विपि-तर्क्-तर्कौ-तर्कः; इति रूपाणि। णिलोपे ककारस्य संयोगान्तलोपो न। 'रात् सस्य' (8-2-24) इति नियमात्। न च णिलोपस्य स्थानिवद्भावः शङ्क्यः। पूर्वत्रासिद्धे तन्निषेधात्।

(709) " तर्ज भर्त्सने " (I-भ्वादिः-227. सक. सेट्. पर.)

'सन्तर्जने तर्जयते भर्त्सनार्थे तु तर्जति ॥' (श्लो. 66) इति देवः।

तर्जकः-र्जिका, तर्जकः-र्जिका, तितर्जिषकः-षिका, तातर्जकः-र्जिका; तर्जिता-त्री, तर्जयिता-त्री, तितर्जिषिता-त्री, तातर्जिता-त्री;

---

1. 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (6-4-93) इति णमुल्परे णौ दीर्घविकल्पः।
2. 'असुन्' [द. उ. 9-49] इत्यसुन् प्रत्ययः।
3. औणादिके [द. उ. 9-44] असच्प्रत्यये रूपम्।
4. 'असितम्योर्दीर्घश्च' [द. उ. 8-36] इति रक्प्रत्ययः, दीर्घश्च। तम्यते जनैरिति ताम्रम्=लोहविशेषः।

A. 'मधुरिपोरभिताम्रमुखी मुदं दिवि तदा विततान शुकावलिः।' शि. व. 6.53.
B. 'प्रतय्य किंचिन्नयितो गृहान्तिकं ददर्श धन्यः स दयालुमीश्वरम्।' धा.का. 1.62.